॥ श्रीः ॥

॥ लघुस्तोत्राणि ॥

(द्वितीयो भागः)

श्रीमत्परमहंसेत्यादिसमस्तविरुदाङ्कित श्रीजगद्गुरु शृङ्गगिरि

श्रीमच्चिदानन्दशिवाभिनव

नृसिंहभारतीस्वामिभिः

विरचितानि ।



श्रीरङ्गस्थ

श्रीवाणीविलासमुद्रायन्त्रालये

संमुद्रितानि ।


१९०८.

Copyright *Registered.*



॥ श्रीः ॥

॥ दक्षिणामूर्तिनक्षत्रमाला ॥



श्रीकण्ठमिन्द्वर्भकभासिचूडं
श्रीज्ञानदानव्रतबद्धदीक्षम् ।
श्रीशाम्बुजन्मप्रभवादिपूज्यं
श्रीदक्षिणाख्यं हृदि भावयेऽहम् ॥ १ ॥

हरन्तमानम्रजनानुतापं
हयेभवक्त्रोडितपादपद्मम् ।
हृदा मुनीन्द्रैः परिचिन्त्यमानं
श्रीदक्षिणास्यं हृदि भावयेऽहम् ॥ २ ॥

हस्ताब्जराजद्वरपुस्तमुद्रा-
मुक्ताक्षमालामृतपूर्णकुम्भम् ।
हरिद्धवाकाङ्क्षितपादसेवं
श्रीदक्षिणास्यं हृदि भावयेऽहम् ॥ ३ ॥

हंसाग्निचन्द्रेक्षणमन्धकारि-
माकारनिर्धूतमनोजगर्वम् ।
हृतादिमाज्ञानमगोद्भवेशं
श्रीदक्षिणास्यं हृदि भावयेऽहम् ॥ ४ ॥

हृत्वा पुरा कालमखर्वगर्वं
मृकण्डुसूनोः पारिरक्षणं यः ।
चकार कारुण्यवशात्तमेनं
श्रीदक्षिणास्यं हृदि भावयेऽहम् ॥ ५ ॥

हृत्वा तमः सत्वरमेव हार्दं
दत्त्वा च बोधं परमार्थसंस्थम् ।
मोक्षं ददात्याशु नताय यस्तं
श्रीदक्षिणास्यं हृदि भावयेऽहम् ॥ ६ ॥

हसन्मुखाम्भोरुहमिन्दुकुन्द-
नीकाशदन्तावलिशोभमानम् ।
रदाम्बराधःकृतपक्वबिम्बं
श्रीदक्षिणास्यं हृदि भावयेऽहम् ॥ ७ ॥

हेलालवान्निर्मितविश्वबृन्दं
बालारुणाभाङ्घ्रियुगं दयालुम् ।
पश्यन्तमुत्सङ्गगतं षडास्यं
श्रीदक्षिणास्यं हृदि भावयेऽहम् ॥ ८ ॥

ह्रीमान्भवेद्देवगुरुर्यदीय-
पादाब्जसंसेवकलोकवाचा ।
तं दिव्यवाग्दानधुरीणमाशु
श्रीदक्षिणास्यं हृदि भावयेऽहम् ॥ ९ ॥

हारायिताहीशमनङ्गगर्व-
भङ्गप्रगल्भान्प्रणतानशेषान् ।
कुर्वन्तमिष्टप्रदमष्टमूर्तिं
श्रीदक्षिणास्यं हृदि भावयेऽहम् ॥ १० ॥

हरिर्जहाराचलकन्यका च
यद्वर्ष्मणोऽर्धं तपसा हि पूर्वम् ।
अतोऽशरीरं तमशेषसंस्थं
श्रीदक्षिणास्यं हृदि भावयेऽहम् ॥ ११ ॥

हन्यादशेषं कलुषं यदङ्घ्रि-
पूजा प्रदद्यादपि सर्वमिष्टम् ।
तं पार्वतीमानसराजहंसं
श्रीदक्षिणास्यं हृदि भावयेऽहम् ॥ १२ ॥

हठादियोगान्प्रविधाय चित्त-
स्थैर्यं प्रपद्याङ्घ्रियुगं यदीयम् ।
ध्यायन्ति योगिप्रवरा मुदा तं
श्रीदक्षिणास्यं हृदि भावयेऽहम् ॥ १३ ॥

हितोपदेष्टा दयया नतानां
निसर्गया यो यतिनां जवाद्धि ।
न्यग्रोधमूलैकनिकेतनं तं
श्रीदक्षिणास्यं हृदि भावयेऽहम् ॥ १४ ॥

हतारिषट्कैरनुभूयमानं
नितान्तमानन्दघनस्वरूपम ।
नतापराधान्सहमानमीशं
श्रीदक्षिणास्यं हृदि भावयेऽहम ॥ १५ ॥

हित्वा धनापत्यकलत्रबन्धून
दत्त्वाभयं भूततते र्द्विजाग्र्याः ।
यं यान्ति लोके शरणं सदा तं
श्रीदक्षिणास्यं हृदि भावयेऽहम ॥ १६ ॥

हृदम्बुजाते विनिवेश्य चित्तं
निरुद्ध्य चक्षुःप्रमुखाक्षवर्गम ।
ध्यायन्ति यं शैलसुतायुतं तं
श्रीदक्षिणास्यं हृदि भावयेऽहम ॥ १७ ॥

हासप्रभानिर्जितभाभिमानं
प्रामार्थजुष्टां कवितां दिशन्तम ।
नतोत्तमाङ्गेषु करं दधानं
श्रीदक्षिणास्यं हृदि भावयेऽहम ॥ १८ ॥

हैयङ्गवीनं हृदयम्रदिम्ना
स्वरेण हंसं चरणेन पद्मम् ।
हसन्तमंसाग्रलसज्जटालं
श्रीदक्षिणास्यं हृदि भावयेऽहम् ॥ १९ ॥

हरेर्विधेश्चैव विवादशान्त्यै
लिङ्गात्मना यः प्रबभूव पूर्वम् ।
तमादिमध्यान्तविहीनरूपं
श्रीदक्षिणास्यं हृदि भावयेऽहम् ॥ २० ॥

हुताशनादित्यमहीप्रमुख्या
यस्याष्ट मूर्तीर्निजगाद वेदः ।
तं सर्वलोकावनसक्तचित्तं
श्रीदक्षिणास्यं हृदि भावयेऽहम् ॥ २१ ॥

हस्त्यन्तलक्ष्मीमपि दीनवर्यः
प्राप्नोति यत्पादसरोजनत्या ।
तं कल्पवल्लीमदभङ्गदक्षं
श्रीदक्षिणास्यं हृदि भावयेऽहम् ॥ २२ ॥

हयाग्र्यमारुह्य गजोत्तमं वा
समेत्य यत्पादयुगार्चकाय ।
यच्छन्ति राज्यं धरणीधवास्तं
श्रीदक्षिणास्यं हृदि भावयेऽहम् ॥ २३ ॥

हवींषि संजुह्वति भूसुराग्र्याः
कालेषु वह्नौ यदनुग्रहार्थम् ।
कर्मानुगुण्येन फलप्रदं तं
श्रीदक्षिणास्यं हृदि भावयेऽहम् ॥ २४ ॥


हेत्या ललाटस्थशुचेर्महाघ-
वनं दहन्तं तरसैव मोदात् ।
कुर्वन्तमारान्नतचित्तशुद्धिं
श्रीदक्षिणास्यं हृदि भावयेऽहम् ॥ २५ ॥

हेमाश्मनोः साम्यमतिं करोति
यत्पादपाथोरुहसक्तचित्तः ।
वैराग्यदानैकधुरन्धरं तं
श्रीदक्षिणास्यं हृदि भावयेऽहम् ॥ २६ ॥

हालास्यगोकर्णमुखेषु दिव्य-
क्षेत्रेषु वासं कृपया करोति ।
यः पादनम्रोद्धृतये सदा तं
श्रीदक्षिणास्यं हृदि भावयेऽहम् ॥ २७ ॥

हंसेन केनापि परादिनेमां
कृतां प्रयत्नादतिमोदतश्च ।
नक्षत्रमालां दधतां नराणां
कण्ठे भविष्यत्यचिरात्परासिः ॥ २८ ॥





॥ दक्षिणामूर्तिपञ्चरत्नम् ॥

भवाम्भोधिपारं नयन्तं स्वभक्तान्
कृपापूरपूर्णैरपाङ्गैः स्वकीयैः ।
समस्तागमान्तप्रगीतापदानं
सदा दक्षिणास्यं तमाराधयेऽहम् ॥ १ ॥

सुधासूतिबालोल्लसन्मौलिभागं
सुधाकुम्भमालालसत्पाणिपद्मम् ।
सपुत्रं सदारं सशिष्यं सवाहं
सदा दक्षिणास्यं तमाराधयेऽहम् ॥ २ ॥

जडायापि विद्यां प्रयच्छन्तमाशु
प्रपन्नार्तिविध्वंसदक्षाभिधानम् ।
जराजन्ममृत्यून्हरन्तं प्रमोदात्
सदा दक्षिणास्यं तमाराधयेऽहम् ॥ ३ ॥

यमाराध्य पद्माक्षपद्मोद्भवाद्याः
　　सुराग्र्याः स्वकार्येषु शक्ता बभूवुः ।
रमाभारतीपार्वतीस्तूयमानं
　　सदा दक्षिणास्यं तमाराधयेऽहम् ॥ ४ ॥

चतुर्विंशदर्णस्य मन्त्रोत्तमस्य
　　प्रजापादृढं वश्यभावं समेत्य ।
प्रयच्छत्यरं यश्च विद्याममोघां
　　सदा दक्षिणास्यं तमाराधयेऽहम् ॥ ५ ॥

पिनद्धानि भक्त्याख्यसूत्रेण कण्ठे
　　सदा पञ्चरत्नानि धत्ते दृढं यः ।
मुदा मुक्तिकान्ता द्रुतं तं वृणीते
　　स्वयं शान्तिदान्तिप्रमुख्यालियुक्ता ॥ ६ ॥





॥ विद्यातीर्थाष्टकम् ॥

लम्बिकायोगनिरत-
मम्बिकापतिरूपिणम् ।
विद्याप्रदं नतौघाय
विद्यातीर्थमहेश्वरम् ॥ १ ॥

वर्णचतुष्टयमेत-
द्विद्यातीर्थेति यस्य जिह्वाग्रे ।
विलसति सदा स योगी
भोगी च स्यान्न तत्र संदेहः ॥ २ ॥

हृद्या विद्या वृणुते
यत्पदनम्रं नरं शीघ्रम् ।
तं कारुण्यपयोधिं
विद्यातीर्थं नमामि योगीशम् ॥ ३ ॥

पापान्धकारसूर्यं
तापाम्भोधिप्रवृद्धबडबाग्निम् ।
अद्यापि योगनिरतं
विद्यातीर्थं नमामि योगीशम् ॥ ४ ॥

पद्मावलीर्मुखाब्जा-
दयत्नतो निःसरेच्छीघ्रम् ।
हृद्या यत्कृपया तं
विद्यातीर्थं नमामि योगीशम् ॥ ५ ॥


भक्त्या यत्पदपद्मं
भजतां योगः षडङ्गयुतः ।
सुलभस्तं करुणाब्धिं
विद्यातीर्थं नमामि योगीशम् ॥ ६ ॥

विद्यारण्यप्रमुखै-
र्विद्यापारंगतैः सेव्यम् ।
नतहृन्मानसहंसं
विद्यातीर्थं नमामि योगीशम् ॥ ७ ॥


विद्यां दत्वाविद्यां
क्षिप्रं वारयति यः प्रणम्राणाम् ।
दयया निसर्गया तं
विद्यातीर्थं नमामि योगीशम् ॥ ८ ॥

विद्यातीर्थाष्टकमिदं
पठन् भक्तिपुरःसरम् ।
विद्यामनन्यसामान्यां
प्राप्य मोदमवाप्नुयात् ॥ ९ ॥





॥ पादारविन्ददशकम् ॥



संसाराम्बुधिमग्नलोकवितते: पोतं यदाहुर्विद:
कंसारातिपुरारिभेदमतिहृत्स्वार्चापराणां चिरम् ।
विद्यारण्यमुखैर्महामुनिवरै: संपूजितं तन्मुदा
विद्यातीर्थपदारविन्दयुगलं वन्दे जगत्पावनम् ॥ १ ॥

हृद्या पद्यततिर्मुखाब्जकुहराद्यत्पूजकानां जवात्
निर्गच्छत्यमरापगेव सरसा स्वच्छापि तद्भक्तित: ।
तुङ्गाभिख्यनदीतटान्तविलसच्छ्रीमन्दिरे संस्थितं
विद्यातीर्थपदारविन्दयुगलं वन्दे जगत्पावनम् ॥ २ ॥

यत्प्रीतिप्रतिपित्सुभिर्हरिहराभिख्याद्यभूपालकै-
र्विप्रेभ्य: श्रुतिविद्य एव बहवो ग्रामा विसृष्टा: पुरा ।
तद्राजव्रजवन्द्यमानमनिशं राजाधिराजत्वदं
विद्यातीर्थपदारविन्दयुगलं वन्दे जगत्पावनम् ॥ ३ ॥

यत्प्रीत्यर्थमतीव सुन्दरतमं श्रीयन्त्रतुल्यं गृहं
बुक्कक्ष्मापतिवंशजेन धरणीशानेन निर्मापितम् ।
तन्नम्राखिलभाग्यदानचतुरं भूदेवभाग्योदयं
विद्यातीर्थपदारविन्दयुगलं वन्दे जगत्पावनम् ॥ ४ ॥

हंसाद्यैर्यतिभिः स्वधर्मनिरतैः संसेव्यमानं मुदा
निःसारत्वधियं तनोति तरसा सर्वेषु भोग्येषु यत् ।
आम्नायान्तरहस्यबोधनचणं तत्सर्वसिद्धिप्रदं
विद्यातीर्थपदारविन्दयुगलं वन्दे जगत्पावनम् ॥ ५ ॥


श्रद्धाभक्तिविरक्तिमुख्यसुगुणान् दत्वा चिरात्सेवकान्
संप्राप्ताखिलयोगजालजनितानन्दान् प्रकुर्वत्तथा ।
ब्रह्माहं न च दृश्यवस्त्विति महावाक्योत्थबोधान्वितान्
विद्यातीर्थपदारविन्दयुगलं वन्दे जगत्पावनम् ॥ ६ ॥

शृङ्गाभिख्यमहीधरेन्द्रनिवसल्लोकान्वराकानपि
व्याजात्प्राप्तनिजेक्षणान्करुणया पुण्यौघयुक्तान्तथा ।
कुर्वद्भक्तिभृतान्तरङ्गकमलानप्याशु यत्तन्मुदा
विद्यातीर्थपदारविन्दयुगलं वन्दे जगत्पावनम् ॥ ७ ॥

यच्चित्ते दधतो मुदा परमया लोकान् समस्तान् नृपाः
सेवन्ते भयभक्तिनम्रवपुषः सर्वस्वमप्यादरात् ।
दत्वा यान्ति च दासतां चिरतरां तद्भुक्तिमुक्तिप्रदं
विद्यातीर्थपदारविन्दयुगलं वन्दे जगत्पावनम् ॥ ८ ॥

घण्टानादपुरःसरं प्रतिदिनं रात्रौ गणानां गणै-
र्भक्त्या पूरितमानसैः सुमवरैः कर्पूरनीराजनैः ।
धूपैर्दीपचयैर्मनोहरतरैः संपूज्यमानं मुहुः
विद्यातीर्थपदारविन्दयुगलं वन्दे जगत्पावनम् ॥ ९ ॥

तुङ्गातीरविहारिमानसलसद्भंसायितं सन्ततं
तुङ्गापत्ततिवारणैकनिपुणं शृङ्गारजन्मालयं ।
गङ्गावारिविनिर्मलं विरचयच्चित्तं नतानां जवात्
विद्यातीर्थपदारविन्दयुगलं वन्दे जगत्पावनम् ॥ १० ॥





॥ श्रीजगद्गुरुनरसिंहभारत्यष्टकम् ॥

श्रीकीर्तिप्रतिभानां
भवनं भाविता यदीयपदनत्या ।
तान् दासीकृतभूपान्
वन्दे नरसिंहभारतीपादान् ॥ १ ॥

चित्रं यन्मुखचन्द्रा-
लोकाद्विकसन्ति चित्तपद्मानि ।
शिष्याणामनिशं तान्
वन्दे नरसिंहभारतीपादान् ॥ २ ॥

सरसान् कवितासारान्
वर्षत्यास्येषु नम्रजनतायाः ।
यदपाङ्गवारिदस्तान्
वन्दे नरसिंहभारतीपादान् ॥ ३ ॥

एनःपर्वतभेदे
शतकोटिधुरं दधाति यद्भक्तिः ।
विश्वोत्तंसितपादान्
वन्दे नरसिंहभारतीपादान् ॥ ४ ॥

यद्वाक्छ्रुतिर्नराणां
भवसागरतारणे नौका ।
शीलितनिगमान्तांस्तान्
वन्दे नरसिंहभारतीपादान् ॥ ५ ॥

त्रासितकामगजेन्द्रान्
स्ववचश्चातुर्यतोषितार्यजनान् ।
क्रोधाहिवैनतेयान्
वन्दे नरसिंहभारतीपादान् ॥ ६ ॥

वितरणधिक्कृतकर्णान्
क्षमया निर्धूतमेदिनीगर्वान् ।
वैभाण्डकपुरभूषा
वन्दे नरसिंहभारतीपादान् ॥ ७ ॥


यत्पादाम्बुजभक्ति-
स्तत्त्वप्रासादगमननिःश्रेणी ।
तान्नतसुखाब्धिचन्द्रान
वन्दे नरसिंहभारतीपादान् ॥ ८ ॥

स्तुतिमेनां गुरुकृपया
रचितामवनावहर्निशं पठताम् ।
करुणार्नारधयः स्युः
हृष्टा नरसिंहभारतीपादाः ॥ ९ ॥





॥ गुरुस्तवः ॥



श्रीमातृचिन्तनरतः
श्रीशाङ्करभाष्यजलधिराकेन्दुः ।
श्रीबोधदाननिरतः
श्रीमान् मम मनसि देशिकः स्फुरतु ॥ १ ॥

नृपमौलिराजिताङ्घ्रिः
नृहरिपदाम्भोजपूजनासक्तः ।
नृवराराधितचरणो
नृत्यतु गुरुराट् मदीयहृद्रङ्गे ॥ २ ॥

सिन्धुरसमानगमनः
सिन्धुतरङ्गाभनैजवाक्प्रसरः ।
सिंहः प्रतिवादिगजे
सिन्दूरसदृक्षवस्त्रयुग्जयति ॥ ३ ॥

हसितविनिर्जितचन्द्रो
हरिदन्तविराजमानसत्कीर्तिः ।
हरतादघमखिलं मे
हतरिपुषट्कः सदानन्दः ॥ ४ ॥

भाति नरोऽल्पविदां
यो भारत्येव प्रकृष्टबुद्धीनाम् ।
भाधीशतुल्यकान्तिः
भातु स मे चित्तसरसिजे गुरुराट् ॥ ५ ॥

रतिरमणगर्वहारी
रजताचलसदनसक्तचेतस्कः ।
रचयतु मम हृदयाब्जं
रजसातमसाविहीनमाशु गुरुः ॥ ६ ॥

तीर्णभववारिराशिः
तीर्थाटनलोलहृदयकंजातः ।
तीव्राज्ञानमिदं मे
तीर्थेट् शमयेद्द्रुतं दयया ॥ ७ ॥

जडताम्बुधिबडबाग्निः
जनकमहीपादितुल्यबोधयुतः ।
जनयतु तत्त्वज्ञानं
जगदेकगुरुर्नृसिंहयतिराट् मे ॥ ८ ॥

यतिपतिनिषेव्यपादो
यमनियमाद्यङ्गयुक्तयोगज्ञः ।
यमभयवारणदक्षो
यच्छतु मह्यं गुरूत्तमो योगम् ॥ ९ ॥

तिष्ठति यदीयचित्तं
तिर्यग्विबुधाग्रिमेषु समदर्शि ।
तिर्यक्त्रिपुण्ड्रफालः
तिरयतु सोऽन्तर्बहिश्च शत्रून्मे ॥





॥ शंकराचार्याष्टकम् ॥

ओमिति दिविषत्प्रवराः
शीर्षे कुर्वन्ति शासनं यस्य ।
ओंकारपद्मभृङ्गं
तमहं प्रणमामि शंकराचार्यम् ॥ १ ॥

नत्वा यत्पदयुग्मं
वाचस्पतिगर्वहारिवाक्तयः ।
प्रभवन्ति हि भुवि मूका-
स्तमहं प्रणमामि शंकराचार्यम् ॥ २ ॥

मन्मथमातङ्गजये
कण्ठीरवतां प्रयाति जनसंघः ।
यत्पादाम्बुजनत्या
तमहं प्रणमामि शंकराचार्यम् ॥ ३ ॥

शंपा प्राप पुरात्तैः
पुण्यैर्नूनं यदीयतनुसाम्यम् ।
शङ्कादुर्द्रुमपरशुं
तमहं प्रणमामि शंकराचार्यम् ॥ ४ ॥

कम्बुस्तपन् जलान्त-
र्न प्राप तुलां यदीयकण्ठस्य ।
काङ्क्षितदानधुरीणं
तमहं प्रणमामि शंकराचार्यम् ॥ ५ ॥

राजाधिराजपदवीं
सद्यः प्राप्नोति दीनधौरेयः ।
यस्यापाङ्गालोका-
त्तमहं प्रणमामि शंकराचार्यम् ॥ ६ ॥

अज्ञोऽप्यश्रुतशास्त्रा-
ण्याशु किल व्याकरोति यत्कृपया ।
निखिलकलाधिपमनिशं
तमहं प्रणमामि शंकराचार्यम् ॥ ७ ॥

यमनियमाद्यङ्गयुतो
योगः सुलभो यदीयपदभाजाम् ।
यमभीतिभञ्जनकरं
तमहं प्रणमामि शंकराचार्यम् ॥ ८ ॥

स्तवराजं गुरुकृपया
कृतवान् श्रीसच्चिदानन्दः ।
अवनौ भक्त्या पठतां
शं तनुताच्छंकराचार्यः ॥ ९ ॥





॥ चन्द्रचूडालाष्टकम् ॥

यमनियमाद्यङ्गयुतै-
यौंगैर्यत्पादपङ्कजं द्रष्टुम् ।
प्रयतन्ते मुनिवर्या-
स्तमहं प्रणमामि चन्द्रचूडालम् ॥ १ ॥

यमगर्वभञ्जनचणं
नमतां सर्वेष्टदानधौरेयम् ।
शमदमसाधनसंप-
ल्लभ्यं प्रणमामि चन्द्रचूडालम् ॥ २ ॥

यं द्रोणबिल्वमुख्यैः
पूजयतां द्वारि मत्तमातङ्गाः ।
कण्ठे लसन्ति विद्या-
स्तमहं प्रणमामि चन्द्रचूडालम् ॥ ३ ॥

नलिनभवपद्मनेत्र-
प्रमुखामरसेव्यमानपदपद्मम् ।
नतजनविद्यादान-
प्रवणं प्रणमामि चन्द्रचूडालम् ॥ ४ ॥

नुतिभिर्देववराणां
मुखरीकृतमन्दिरद्वारम् ।
स्तुतिमादिमवाक्ततिभिः
सततं प्रणमामि चन्द्रचूडालम् ॥ ५ ॥

जन्तोस्तव पदपूजन-
करणात्करपद्मगाः पुमर्थाः स्युः ।
मुरहरपूजितपादं
तमहं प्रणमामि चन्द्रचूडालम् ॥ ६ ॥

चेतसि चिन्तयतां य-
त्पदपद्मं सत्वरं वक्त्रात् ।
निःसरति वाक्सुधाभा
तमहं प्रणमामि चन्द्रचूडालम् ॥ ७ ॥

नम्राज्ञानतमस्तति-
दूरीकरणाय नेत्रलक्ष्याद्यः ।
धत्तेऽग्निचन्द्रसूर्यान्
तमहं प्रणमामि चन्द्रचूडालम् ॥ ८ ॥

अष्टकमेतत्पठतां
स्पष्टतरं कष्टनाशनं पुंसाम् ।
अष्ट ददाति हि सिद्धी-
रिष्टसमष्टीश्च चन्द्रचूडालः ॥ ९ ॥

